# Sharabha Upanishad

# શરભોપનિષત્

## Document Information

Text title : Sharabha Upanishad

File name : sharabha.itx

Category : upanishhat, svara

Location : doc_upanishhat

Author : Vedic tradition

Transliterated by : Sunder Hattangadi

Proofread by : Sunder Hattangadi

Description-comments : 50 / 108; Atharva Veda - shaiva upanishad

Latest update : Mar. 19, 2000

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 22, 2023

*sanskritdocuments.org*

# શરભોપનિષત્

સર્વં સન્ત્યજ્ય મુનયો યદ્ભજન્ત્યાત્મરૂપતઃ ।
તચ્છારભં ત્રિપાદ્બ્રહ્મ સ્વમાત્રમવશિષ્યતે ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાꣳસસ્તનૂભિઃ ।
વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વદેવાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ॥

ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

અથ હૈનં પૈપ્પલાદો બ્રહ્માણમુવાચ ભો ભગવન્
બ્રહ્મવિષ્ણુરુદ્રાણાં મધ્યે કો વા અધિકતરો ધ્યેયઃ
સ્યાત્તત્ત્વમેવ નો બ્રૂહીતિ ।
તસ્મૈ સ હોવાચ પિતામહશ્ચ
હે પૈપ્પલાદ શ‍ૃણુ વાક્યમેતત્ ।
બહૂનિ પુણ્યાનિ કૃતાનિ યેન
તેનૈવ લભ્યઃ પરમેશ્વરોઽસૌ ।
યસ્યાઙ્ગજોઽહં હરિરિન્દ્રમુખ્યા
મોહાન્ન જાનન્તિ સુરેન્દ્રમુખ્યાઃ ॥ ૧॥

પ્રભું વરેણ્યં પિતરં મહેશં
યો બ્રહ્માણં વિદધાતિ તસ્મૈ ।
વેદાંશ્ચ સર્વાન્પ્રહિણોતિ ચાગ્ર્યં
તં વૈ પ્રભું પિતરં દેવતાનામ્ ॥ ૨॥

મમાપિ વિષ્ણોર્જનકં દેવમીડ્યં
યોઽન્તકાલે સર્વલોકાન્સંજહાર ॥ ૩॥

સ એકઃ શ્રેષ્ઠશ્ચ સર્વશાસ્તા સ એવ વરિષ્ઠશ્ચ ।
યો ઘોરં વેષમાસ્થાય શરભાખ્યં મહેશ્વરઃ ।
નૃસિંહં લોકહન્તારં સંજઘાન મહાબલઃ ॥ ૪॥

હરિં હરન્તં પાદાભ્યામનુયાન્તિ સુરેશ્વરાઃ ।
માવધીઃ પુરુષં વિષ્ણું વિક્રમસ્વ મહાનસિ ॥ ૫॥

કૃપયા ભગવાન્વિષ્ણું વિદદાર નખૈઃ ખરૈઃ ।
ચર્મામ્બરો મહાવીરો વીરભદ્રો બભૂવ હ ॥ ૬॥

સ એકો રુદ્રો ધ્યેયઃ સર્વેષાં સર્વસિદ્ધયે । યો બ્રહ્મણઃ પઞ્ચવક્ત્રહન્તા
તસ્મૈ રુદ્રાય નમો અસ્તુ ॥ ૭॥

યો વિસ્ફુલિઙ્ગેન લલાટજેન સર્વં જગદ્ભસ્મસાત્સંકરોતિ ।
પુનશ્ચ સૃષ્ટ્વા પુનરપ્યરક્ષદેવં સ્વતન્ત્રં પ્રકટીકરોતિ ।
તસ્મૈ રુદ્રાય નમો અસ્તુ ॥ ૮॥

યો વામપાદેન જઘાન કાલં ઘોરં પપેડથો હાલહલં દહન્તમ્ ।
તસ્મૈ રુદ્રાય નમો અસ્તુ ॥ ૯॥

યો વામપાદાર્ચિતવિષ્ણુનેત્રસ્તસ્મૈ દદૌ ચક્રમતીવ હૃષ્ટઃ ।
તસ્મૈ રુદ્રાય નમો અસ્તુ ॥ ૧૦॥

યો દક્ષયજ્ઞે સુરસઙ્ઘાન્વિજિત્ય
વિષ્ણું બબન્ધોરગપાશેન વીરઃ ।
તસ્મૈ રુદ્રાય નમો અસ્તુ ॥ ૧૧॥

યો લીલયૈવ ત્રિપુરં દદાહ
વિષ્ણું કવિં સોમસૂર્યાગ્નિનેત્રઃ ।
સર્વે દેવાઃ પશુતામવાપુઃ
સ્વયં તસ્માત્પશુપતિર્બભૂવ ।
તસ્મૈ રુદ્રાય નમો અસ્તુ ॥ ૧૨॥

યો મત્સ્યકૂર્માદિવરાહસિંહા-
ન્વિષ્ણું ક્રમન્તં વામનમાદિવિષ્ણુમ્ ।
વિવિક્લવં પીડ્યમાનં સુરેશં
ભસ્મીચકાર મન્મથં યમં ચ ।

તસ્મૈ રુદ્રાય નમો અસ્તુ ॥ ૧૩॥

એવં પ્રકારેણ બહુધા પ્રતુષ્ટ્વા
    ક્ષમાપયામાસુર્નીલકણ્ઠં મહેશ્વરમ્ ।
તાપત્રયસમુદ્ભૂતજન્મમૃત્યુજરાદિભિઃ ।
નાવિધાનિ દુઃખાનિ જહાર પરમેશ્વરઃ ॥૧૪॥

એવં મન્ત્રૈઃ પ્રાર્થ્યમાન આત્મા વૈ સર્વદેહિનામ્ ।
શઙ્કરો ભગવાનાદ્યો રરક્ષ સકલાઃ પ્રજાઃ ॥ ૧૫॥

યત્પાદામ્ભોરુહદ્વન્દ્વં મૃગ્યતે વિષ્ણુના સહ ।
સ્તુત્વા સ્તુત્યં મહેશાનમવાઙ્મનસગોચરમ્ ॥ ૧૬॥

ભક્ત્યા નમ્રતનોર્વિષ્ણોઃ પ્રસાદમકરોદ્વિભુઃ ।
યતો વાચો નિવર્તન્તે અપ્રાપ્ય મનસા સહ ।
આનન્દં બ્રહ્મણો વિદ્વાન્ન બિભેતિ કદાચનેતિ ॥ ૧૭॥

અણોરણીયાન્મહતો મહીયા-
    નાત્માસ્યજન્તોર્નિહિતો ગુહાયામ્ ।
તમક્રતું પશ્યતિ વીતશોકો
    ધાતુઃપ્રસાદાન્મહિમાનમીશમ્ ॥ ૧૮॥

વસિષ્ઠવૈયાસકિવામદેવ-
    વિરિઞ્ચિમુખ્યૈર્હૃદિ ભાવ્યમાનઃ ।
સનત્સુજાતાદિસનાતનાદ્યૈ-
    રીડ્યો મહેશો ભગવાનાદિદેવઃ ॥ ૧૯॥

સત્યો નિત્યઃ સર્વસાક્ષી મહેશો
    નિત્યાનન્દો નિર્વિકલ્પો નિરાખ્યઃ ।
અચિન્ત્યશક્તિર્ભગવાન્ગિરીશઃ
    સ્વાવિદ્યયા કલ્પિતમાનભૂમિઃ ॥ ૨૦॥

અતિમોહકરી માયા મમ વિષ્ણોશ્ચ સુવ્રત ।
તસ્ય પાદામ્બુજધ્યાનાદ્દુસ્તરા સુતરા ભવેત્ ॥ ૨૧॥

વિષ્ણુર્વિશ્વજગદ્યોનિઃ સ્વાંશભૂતૈઃ સ્વકૈઃ સહ ।
મમાંશસંભવો ભૂત્વા પાલયત્યખિલં જગત્ ॥ ૨૨॥

વિનાશં કાલતો યાતિ તતોઽન્યત્સકલં મૃષા ।

ॐ તસ્મૈ મહાગ્રાસાય મહાદેવાય શૂલિને ।
મહેશ્વરાય મૃડાય તસ્મૈ રુદ્રાય નમો અસ્તુ ॥ ૨૩॥

એકો વિષ્ણુર્મહદ્ભૂતં પૃથગ્ભૂતાયનેકશઃ ।
ત્રીંલ્લોકાન્વ્યાપ્ય ભૂતાત્મા ભુઙ્ક્તે વિશ્વભુગવ્યયઃ ॥ ૨૪॥

ચતુર્ભિશ્ચ ચતુર્ભિશ્ચ દ્વાભ્યાં પઞ્ચમિરેવ ચ ।
હૂયતે ચ પુનર્દ્વાભ્યાં સ મે વિષ્ણુઃ પ્રસીદતુ ॥ ૨૫॥

બ્રહ્માર્પણં બ્રહ્મ હવિર્બ્રહ્માગ્નૌ બ્રહ્મણા હુતમ્ ।
બ્રહ્મૈવ તેન ગન્તવ્યં બ્રહ્મકર્મસમાધિના ॥ ૨૬॥

શરા જીવાસ્તદઙ્ગેષુ ભાતિ નિત્યં હરિઃ સ્વયમ્ ।
બ્રહ્મૈવ શરભઃ સાક્ષાન્મોક્ષદોઽયં મહામુને ॥ ૨૭॥

માયાવશાદેવ દેવા મોહિતા મમતાદિભિઃ ।
તસ્ય માહાત્મ્યલેશાંશં વક્તું કેનાપ્ય શક્યતે ॥ ૨૮॥

પરાત્પરતરં બ્રહ્મ યત્પરાત્પરતો હરિઃ ।
પરાત્પરતરો હીશસ્તસ્માત્તુલ્યોઽધિકો ન હિ ॥ ૨૯॥

એક એવ શિવો નિત્યસ્તતોઽન્યત્સકલં મૃષા ।
તસ્માત્સર્વાન્પરિત્યજ્ય ધ્યેયાન્વિષ્ણ્વાદિકાન્સુરાન્ ॥ ૩૦॥

શિવ એવ સદા ધ્યેયઃ સર્વસંસારમોચકઃ ।
તસ્મૈ મહાગ્રાસાય મહેશ્વરાય નમઃ ॥ ૩૧॥

પૈપ્પલાદં મહાશાસ્ત્રં ન દેયં યસ્ય કસ્યચિત્ ।
નાસ્તિકાય કૃતઘ્નાય દુર્વૃત્તાય દુરાત્મને ॥ ૩૨॥

દાંભિકાય નૃશંસાય શઠાયાનૃતભાષિણે ।
સુવ્રતાય સુભક્તાય સુવૃત્તાય સુશીલિને ॥ ૩૩॥

ગુરુભક્તાય દાન્તાય શાન્તાય ઋજુચેતસે ।
શિવભક્તાય દાતવ્યં બ્રહ્મકર્મોક્તધીમતે ॥ ૩૪॥

સ્વભક્તાયૈવ દાતવ્યમકૃતઘ્નાય સુવ્રતમ્ ।
ન દાતવ્યં સદા ગોપ્યં યત્નેનૈવ દ્વિજોત્તમ ॥ ૩૫॥

એતત્પૈપ્પલાદં મહાશાસ્ત્રં યોઽધીતે શ્રાવયેદ્વિજઃ
સ જન્મમરણેભ્યો મુક્તો ભવતિ । યો જાનીતે સોઽમૃતત્વં

ચ ગચ્છતિ । ગર્ભવાસાદ્વિમુક્તો ભવતિ । સુરાપાનાત્પૂતો
ભવતિ । સ્વર્ણસ્તેયાત્પૂતો ભવતિ । બ્રહ્મહત્યાત્પૂતો
ભવતિ । ગુરુતલ્પગમનાત્પૂતો ભવતિ । સ સર્વાન્વેદાનધીતો
ભવતિ । સ સર્વાન્દેવાન્ધ્યાતો ભવતિ । સ સમસ્તમહાપાતકો-
પપાતકાત્પૂતો ભવતિ । તસ્માદવિમુક્તમાશ્રિતો ભવતિ ।
સ સતતં શિવપ્રિયો ભવતિ । સ શિવસાયુજ્યમેતિ । ન સ
પુનરાવર્તતે ન સ પુનરાવર્તતે । બ્રહ્મૈવ ભવતિ । ઇત્યાહ
ભગવાન્બ્રહ્મેત્યુપનિષત્ ॥

ૐ ભદ્રં કર્ણેભિઃ શ‍ૃણુયામ દેવાઃ ।
ભદ્રં પશ્યેમાક્ષભિર્યજત્રાઃ ।
સ્થિરૈરઙ્ગૈસ્તુષ્ટુવાँ સસ્તનૂભિઃ ।
વ્યશેમ દેવહિતં યદાયુઃ ।
સ્વસ્તિ ન ઇન્દ્રો વૃદ્ધશ્રવાઃ । સ્વસ્તિ નઃ પૂષા વિશ્વવેદાઃ ।
સ્વસ્તિ નસ્તાર્ક્ષ્યો અરિષ્ટનેમિઃ । સ્વસ્તિ નો બૃહસ્પતિર્દધાતુ ।
ૐ શાન્તિઃ શાન્તિઃ શાન્તિઃ ॥

ઇતિ શરભોપનિષત્સમાપ્તા ॥

Encoded by Sunder Hattangadi

*Sharabha Upanishad*

pdf was typeset on December 22, 2023

Please send corrections to *sanskrit@cheerful.com*